## स्वरतिसूतिसूयतिधूञूदितो वा। (४४/२२७९)

स्वरति सूति सूयति धूञ् इत्येतेभ्य:, ऊदिद्भ्यश्चोत्तरस्य वलादेरार्धधातुकस्य वा इडागमो भवति। स्वर्ता, स्वरिता। सूति – प्रसोता, प्रसविता। सूयति – सोता, सविता। धूञ् – धोता, धविता। ऊदिद्भ्य: खल्वपि– गाहू–विगाढा, विगाहिता। गुपू – गोप्ता, गोपिता। वा इति वर्तमाने पुनर्वाग्रहणं लिङ्सिचोर्निवृत्त्यर्थम्। सूति-सूयत्योर्विकरणनिर्देश: 'षू प्रेरणे' (धा.पा १४०९) इत्यस्य निवृत्त्यर्थ:। धूञ् इति [1]सानुबन्धकस्य निर्देशो 'धू विधूनने' (धा.पा. १३९९) इत्यस्य निवृत्त्यर्थ:। सविता, धुविता इत्येव नित्यमेतयोर्भवति। स्वरतेरेतस्माद् विकल्पात् 'ऋद्धनो: स्ये' (७.२.७०/२३६६) इत्येतद्भवति विप्रतिषेधेन। स्वरिष्यति। किति तु प्रत्यये 'श्र्युक: किति' (७.२.११/२३८१) इति नित्य: प्रतिषेधो भवति पूर्वविप्रतिषेधेन। स्वृत्वा। सूत्वा। धूत्वा॥

## रधादिभ्यश्च। (४५/२५१५)

'रध हिंसासंसिद्ध्यो:' (धा.पा. ११९४) इत्येवमादिभ्योऽष्टाभ्य उत्तरस्य वलादेरार्धधातुकस्य वा इडागमो भवति। रद्धा, रधिता। नंष्टा, नशिता। त्रप्ता, तर्प्ता, तर्पिता। द्रप्ता, दर्प्ता, दर्पिता। द्रोग्धा, द्रोढा, द्रोहिता। मोग्धा, मोढा, मोहिता[1], स्नोग्धा, स्नोढा, स्नोहिता। स्नेग्धा, स्नेढा, स्नेहिता। [2]क्रादिनियमाल् [3]लिटि रधादिभ्य: परत्वाद् विकल्पं केचिदिच्छन्ति[4]। [5]अपरे पुनराहु:, पूर्वविधेरिण्निषेधविधानसामर्थ्यात् बलीयस्त्वं प्रतिषेध-नियमस्य इति नित्यमिटा भवितव्यम्। ररन्धिव, ररन्धिम [6]इति भवति॥

## निर: कुष:। (४६/२५६०)

निर् इत्येवंपूर्वात् कुष उत्तरस्य वलादेरार्धधातुकस्य वा इडागमो भवति। निष्कोष्टा, निष्कोषिता। निष्कोष्टुम्, निष्कोषितुम्। निष्कोष्टव्यम्, निष्कोषितव्यम्। निर: इति किम्? कोषिता। कोषितुम्। कोषितव्यम्। निस: इति वक्तव्ये निर: इति [7]निर्देशेन [8]रेफान्तमुपसर्गान्तरमस्ति इति [9]ज्ञाप्यते। [10]तस्य हि निलयनम् इति 'उपसर्गस्यायतौ' (८.२.१९/२३२६) इति लत्वं भवति। निसो हि रुत्वस्य असिद्धत्वाल् लत्वं न स्यात्॥

## इण्निष्ठायाम्। (४७/३०४५)

[11]निर: कुषो निष्ठायाम् इडागमो भवति। निष्कुषित:। निष्कुषितवान्। इड्ग्रहणं नित्यार्थम्। आरम्भो हि 'यस्य विभाषा' (७.२.१५/३०२५) इत्यस्य बाधक:, अन्यथा हि [12]विकल्पार्थ एव स्यात्। अत्रैव [13]नित्यमिडागम:, उत्तरत्र विकल्प एव इति॥

---

1. सानुबन्धनिर्देश: क. 2. क्र्यादिनियमात् ब. 3. इटि क. 4. ररन्ध ररन्धिव ररन्धिम इत्यधिकम् क. 5. अपरे – भवति नास्तिक. 6. इत्येवम् ब. 7. निर्देशो क. 8. रेफान्तमप्युपसर्गान्तरम् क. 9. ज्ञायते ब, ज्ञापनार्थं क, विज्ञायते इ. 10. तेन निलयनम् क. 11. निर् इति वर्तते इत्यधिकम् क. 12. विकल्पस्य एव क, विकल्प एव स्यात् ई. 13. च नित्य इडागम: ई.